International Journal of Sanskrit Research 2022; 8(1): 281-283

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 281-283
© 2022 IJSR
www.anantaajournal.com
Received: 17-11-2021
Accepted: 06-01-2022

**नितिन शर्मा**
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीरणवीरपरिसरःकोटभलवालः
जम्मू, जम्मू कश्मीर, भारत

**Corresponding Author:**
**नितिन शर्मा**
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीरणवीरपरिसरःकोटभलवालः
जम्मू, जम्मू कश्मीर, भारत

# णिजन्तादिप्रक्रियासु लोपपरम्परा

**नितिन शर्मा**

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i1e.1653

## प्रस्तावना

नमो लोप्याय चोलप्याय च [i]

सर्वप्रथम व्याकरणदर्शनस्य आगमविकारप्रक्रियायाः सम्भावनां यः उत्पन्नः करोति एतादृशः लोपस्य बीजरुपेण, वेदेषु शङ्करस्य पर्यायं स्वीकृत्य तं नमस्कारं चकार।
व्याकरणशास्त्रः शब्दस्य स्वरूपस्य सिद्धये निर्मितः एका काल्पनिका प्रक्रिया मन्यते। व्याकरणे लोपस्य प्रयोगेण अभीष्टरुपसिद्धौ अनिष्टानां ध्वनीनां निवारणमात्रं वर्तते। शास्त्रे लोपस्य बहवः नामानि सन्ति यथा- लोपः, खं, अपायः विनाशः इत्याद्यः। एतेषां नाम्नाम् उद्देश्यः वर्तते यत् शब्दशास्त्रस्य प्रक्रिया भवेत् एव। लोपस्य अर्थात् आकाशस्य (शून्यस्य) सार्वभौमिकता सर्वैः स्वीकुर्वन्ति। अस्य शब्दस्य सत्ता वैदिककालात् आरम्भं कृत्वा अद्यावधि पर्यन्तं सर्वैः स्वीकुर्वन्ति।

## लोपस्य अर्थः एवं परिभाषा-

लोपः लुप् धातोः घञ् प्रत्ययः कृत्वा निष्पन्नं भवति। यदा ध्वनेः वा वर्णस्य अनुच्चारणं क्रियते तदा तस्य नाम लोपः अस्ति। परञ्च अनुच्चारणात् अनन्तरम् अपि सः वर्णः तत्रैव विद्यते। पाणिनीय सूत्रपाठे लोपसंज्ञायाः बोधकः सूत्रः अस्ति – अदर्शनं लोपः[ii], जैनेन्द्रव्याकरणस्य सूत्रं वर्तते – नाशः खम्[iii]। पतञ्जलेः महाभाष्ये लोपस्य अन्य नाम अभावः[iv]।

## किं नाम णिजन्तादिप्रक्रियाः -

पाणिनीयाष्टाध्याय्यां पठित तिप्तस्झि....[v] इत्यादि अष्टादशप्रत्ययेषु “तिप्”प्रत्ययस्य “ति” इति शब्दतः “महिङ्” इति पर्यन्तं तिङ् प्रत्याहारं भवति। तिङन्तरुपेण ये शब्दाः सन्ति तेषां पदसंज्ञा भवति। अतः पाणिनीयव्याकरणे आख्यातं तिङन्तं उच्यते।
एतादृशः तिङन्तप्रकरणस्य अङ्गभूतरूपेण णिजन्तादिप्रक्रिया एकं भागमस्ति। प्रक्रियाभागे मुख्यरूपेण णिजन्त-सन्नन्त-यङन्त-यङलुगन्त-नामधातुप्रक्रियाश्च भवन्ति।
णिजन्तप्रक्रिया ण्यन्तप्रक्रिया नाम्ना अपि ज्ञायते। ण्यन्तप्रक्रियायाः प्रयोगं प्रेरणार्थे क्रियते। यथा – पठ् धातोः ण्यन्तप्रक्रियायाः प्रयोगं कृत्वा पाठि इति धातुरूपं भवति। सन् प्रत्ययः यस्य अन्ते भवति तस्य नाम सन्नन्तप्रक्रिया भवति। इच्छार्थे सन्नन्तप्रत्ययस्य प्रयोगं भवति। यथा – “पठितुम् इच्छति” अस्य कृते पिपठिषति इति रूपमपि शुद्धमस्ति। “क्रियायाः

अतिशयः प्रयोगः” इत्यर्थे यङन्तप्रक्रियायाः प्रयोगं भवति। अस्यां प्रक्रियायाम् एकाच्-हलादि-धातोः यङ्-प्रत्ययः भवति। यथा – पापठ्यते। यङ्-प्रत्ययस्य लुक् यत्र भवति तत्र यङ्लुगन्तप्रक्रिया भवति। यथा – बोभवीति। नामधातुप्रक्रिया एतादृशी प्रक्रिया वर्तते यत्र धातुपाठे पठिता या धातु अस्ति तस्याः प्रयोगं न भवति, अपितु सुबन्तप्रातिपदिकात् अर्थात् नाम्नः प्रत्ययं योजित्वा धातुनिर्माणस्य प्रक्रिया भवति। नाम्नः धातु निर्माणात् अस्य नाम नामधातुप्रक्रिया वर्तते।

**णिजन्तप्रक्रियायां लोपः –** यदा धातोः णिच्-प्रत्ययः परे भवति तदा लोपः पदनिर्माणे विशेषं कार्यं करोति यथा –

१. चङ् परक णिचः अस्ति तदा “पिवति” इत्यत्र अङ्गस्य उपधायाः लोपः एवम् अभ्यासम् ईकारादेशं प्राप्नोति।[vi] यथा –

पा णिच् > पायुक् इ > पाय् इ > पाय् इ लुङ् > पाय् इ तिप् > पाय् इ चङ् तिप्> पाय् अ त्> प् य् अ त् > पीप्य् अत् = पीप्यत्। अट् पीप्यत् – अपीप्यत्।

इत्थं प्रकारेण - अर्पयति। ह्रेपयति। रेपयति। स्थापयति।

२. णिच् यदा परे भवति तदा मृगरमणार्थे “रञ्जधातोः” उपधायाः नकारस्य लोपं भवति।[vii] यथा – मृगान् रजयति। प्रत्युदाहरणे रञ्जयति वस्त्राणि।

**सन्नन्तप्रक्रियायां लोपः –** धातोः इछार्थे सन् (स) प्रत्ययः भवति। सन् प्रत्ययः वलादिः आर्धधातुकश्च वर्तते। सन् प्रत्यययुक्तं धातुं सन्नन्तधातुः उच्यते। यदा सन् प्रत्ययः भवति तदा सन्नन्तधातुं द्वित्वं भवति।[viii] यदि धातौ एकाच् अस्ति तर्हि समस्त धातुं द्वित्वं भवति। यदि धातौ अनेकाच् भवति तर्हि तस्य धातोः प्रथमैकाचम् एवं यदि अजादिधातु अस्ति तर्हि द्वितीयमेकाचं द्वित्वं भवति।[ix] द्वित्वानन्तरं पूर्वखण्डस्य संज्ञा अभ्यासः वर्तते। अभ्यासस्य आदिहलं त्यक्त्वा शेषस्य लोपं भवति।[x]

यदि अभ्यासस्य आदिवर्णः शर् वर्तते। शरः खया सह संयोगः दृश्यते तर्हि शरः प्रत्याहारस्य लोपः भवति।[xi] यथा - √श्च्युतिर् धातोः आदिवर्णः शरि प्रत्याहारे विद्यते, तत्पश्चात् विद्यमानः चकारः खयि प्रत्याहारे आयाति अतः द्वित्वं भूत्वा अभ्यासस्य चकारः एव शिष्यते। अन्येषां वर्णानां लोपं भविष्यति। प्रसङ्गेऽस्मिन् हलां लोपविषये एव उक्तमस्ति अतः अचां लोपः न भविष्यति। इत्थं प्रकारेण श्च्युतिर धातोः अभ्यासस्य चकारेण सह उकारमपि शिष्यते। यथा – चुश्च्योतिषति, तिष्ठासति, पिस्पन्दिषते।

**यङन्तप्रक्रियायां लोपः –** संस्कृतभाषायां पुनः पुनः अथवा भृशम् इत्यस्य अर्थं द्योतनाय धातोः यङ्-प्रत्ययं भवति। “यङ्” प्रत्ययः ङित् वर्तते, अतः यङन्तधातोः आत्मनेपदनां प्रत्ययानां विधानं क्रियते। यङ्-प्रत्ययः मात्र एकाच् एवं हलादिः युक्तं धातुमेव वर्तते।[xii] आर्धधातुकस्य विषये हलः परे यकारस्य लोपः भवति।[xiii]

यथा – सोसूच्य+आम्+कृ+एश् – सोसूचाञ्चक्रे। सोसूचिता।

**यङ्लुगन्तप्रक्रियायां लोपः –** उक्तप्रक्रियायां लोपः निम्नप्रकारेण पदरचनां प्रभावयति –

१. अच्-प्रत्ययः परे भवति तर्हि यङः लुक् भवति। वेदे बहुल कृत्वा लुक् भविष्यति।[xiv] यथा – लोलुवः। पोपुवः। लालपीति। वावदीति।

लप् य[xv]। लप् लप् य। ल लप् य। ला लप् य। अच् प्रत्ययः न भवति तर्हि यङ्लुक् भवति। यथा – पापठीति। लालपीति।

२. क्वि झलादिः च कित् ङित् परे रेफस्य उत्तरे छकारवकारयोः लोपः भवति।[xvi] यथा – क्वौ – मूर्छा – मूः, मुरौ, मुरः।

झलादौ – मूर्त्तः, मूर्त्तवान्, मूर्त्तिः

**नामधातुप्रक्रियायां लोपः –** इच्छार्थे अथवा इच्छायाः कर्मरूपसुबन्तात् विकल्पेन “क्यच्-प्रत्ययो” भवति।[xvii] नामधातुनिर्मितं पदेषु लोपस्य प्रभावं निम्ननिर्दिष्टं वर्तते -

१. हलः उत्तरे अङ्गस्य अपत्यसम्बन्धितः यकारस्य लोपः भवति यदि क्य अथवा च्वि परे भवेत्।[xviii] यथा – आत्मनो गार्ग्यमिच्छति – गार्गीयति।

आत्मनः कविमिच्छति – कवीयति।

आर्धधातुकं यदा परे भवति तदा हलः उत्तरे “क्य” इत्यस्य लोपः विकल्पेन भवति।[xix] यथा– समिधमात्मनम् इच्छति, समिद् इवाचरतीति वा – समिध्यिता, समिधिता। समिध्याञ्चकार, समिधाञ्चकार।

२. वेदे पादबद्धमन्त्रस्य विषये यदि “क्यच्” इति परे भवति तर्हि “कवि-अध्वर-पृतना” इत्यस्य अङ्गस्य लोपः भवति।[xx] यथा – कव्यन्तः सुमनसः। अध्वर्यन्तः। पृतन्यन्तस्तिष्ठन्ति।

कवि+क्यच् – कव्य शप्- शतृ – कव्य अ अन्त् जस् – कव्यन्तः।

३. उपमानवाचकः कर्ता सुबन्तात्, आचार्थे विकल्पेन क्यङ्-प्रत्ययः भवति एवं सकारस्य (सकारान्तशब्देषु)

लोपः भवति।[xxi] यथा – पय इवाचरति – पयायते पयस्यते वा तक्रम्।

**निष्कर्षः-** णिजन्तप्रक्रियां लोपस्य प्रभावकारणात् एव चङपरक यदा णिच् भवति तदा पिबति अस्य अङगस्य उपधायाः लोपः तथा अभ्यासम् ईकारादेशं भवति। अत्र लोपः अभ्यासस्य ईकारादेशस्य प्रक्रियायां साधकम् अस्ति। सन्नन्तधातूनां यदा द्वित्वं भवति तदा अभ्यासस्य आदिहल् एव शिष्यते अन्येषां हलानां लोपं भवति। परञ्च अचानां लोपं न क्रियते। यथा – श्च्युतिर् धातोः सन्नन्तरूपमस्ति – चुश्च्योतिषति। नामधातुप्रक्रियासु "क्त","च्वि" च प्रत्यययोःपरे अपत्यसन्बन्धितः यकारस्य लोपः भवति।
तिङन्तस्य अङ्गभूताः याः प्रक्रियाः वर्तन्ते तेषु पदनिर्माणे लोपस्य बहु योगदानं भवति। यदि पाणिनि लोपपरम्परायाः प्रयोगं न अकरिष्यत् तर्हि प्रक्रियायाः रूपनिर्माणे अत्याधिकं क्लिष्टता अभविष्यत्। यथा धातुपाठे पठितः प्रायशः सर्वैः धातुभिः सह अनुबन्धानां प्रयोगं कृत्वा धातूनां सिद्धिः चकार तथैव प्रक्रियायां अभ्यासस्य लोप व्यवस्था कृत्वा प्रक्रियायाः धातूनां सिद्धि अभवत्।
अतः प्रक्रियापदेषु रचनाकाले लोपस्य विशिष्टः प्रभावं दृश्यते।

## सन्दर्भ ग्रन्थ सूची


१. अष्टाध्यायीसूत्रपाठः, सम्पादक, सुधीर कुमार मिश्र, विद्यानिधि प्रकाशन, दिल्ली, 2016
२. ऋग्वेद (तीसरा चौथा एवं पांचवां मण्डल), गोविन्द चन्द्र पाण्डे, लोकभारती पुस्तक विक्रेता तथा वितरक, इलाहाबाद, 2008
३. ऋग्वेदसंहिता, व्याख्याकार डॉ॰ जियालाल कम्बोज, विद्यानिधि प्रकाशन, दिल्ली, 2013
४. काशिका व्याख्याकारः डॉ॰ रघुवीर वेदालङ्कारः, चौखम्भा ओरियन्टालिया दिल्ली, 2010
५. कृष्णयजुर्वेदीय तैत्तिरीय-संहिता मन्त्राः, R.L.Kashyap, Sri Aurobindo Kapali Sastry Institute of Vedic Culture, Bangalore, 2005
६. जैनेन्द्रमहावृत्तिः, सम्पादक पण्डित शम्भुनाथ त्रिपाठी, भारतीय ज्ञान पीठ, काशी, 1956
७. व्याकरणमहाभाष्यम्, व्याख्याकार प्रोफेसर भीमसिंह वेदालङ्कार, विद्यानिधि शोधसंस्थान, कुरुक्षेत्र, 2013


## पादटीका

[i] तैत्तिरीय संहिता 4.5.9.10 (पृष्ठ 402)

[ii] अष्टाध्यायी 1/1/60 (पृष्ठ-7)

[iii] जैनेन्द्र महावृत्ति 1/1/61 (पृष्ठ – 14)

[iv] अभावो लोपः। महाभाष्य (अष्टाध्यायी -1/4/110) भाग-2 पृष्ठ 1240

[v] तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् (अष्टाध्यायी 3/4/78 पृष्ठ 171)

[vi] लोपः पिबतेरीच्चाभ्यासस्य (अष्टाध्यायी 7/4/4)

[vii] रञ्जेर्णौ मृगरमणे (अष्टाध्यायी 6/4/24 सूत्रस्य वार्त्तिकम्)

[viii] सन्यङोः (अष्टाध्यायी 6/1/9)

[ix] एकाचो द्वे प्रथमस्य (अष्टाध्यायी 6/1/1) अजादेर्द्वितीयस्य (अष्टाध्यायी 6/1/2)

[x] हलादिशेषः (अष्टाध्यायी 7/4/60)

[xi] शर्पूर्वाः खयः (अष्टाध्यायी 7/4/61)

[xii] धातोरेकाचो हलादेः क्रिया – समभिहारे यङ् (अष्टाध्यायी 3/1/22)

[xiii] यस्य हलः (अष्टाध्यायी 6/4/49)

[xiv] यङोऽचि च (अष्टाध्यायी 2/4/47)

[xv] धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (अष्टाध्यायी 3/1/22)

[xvi] राल्लोपः (अष्टाध्यायी 6/4/21)

[xvii] सुप आत्मनः क्यच् (अष्टाध्यायी 3/1/8)

[xviii] क्यच्व्योश्च (अष्टाध्यायी 6/4/152)

[xix] क्यस्य विभाषा (अष्टाध्यायी 6/4/50)

[xx] कव्यध्वरपृतनस्यर्चि लोपः (अष्टाध्यायी 7/4/39)

[xxi] कर्त्तुः क्यङ् सखं विभाषा (जैनेन्द्र महावृत्ति 2/1/9)